# Parameshvarastutisarastotram

# પરમેશ્વરસ્તુતિસારસ્તોત્રમ્

## Document Information

Text title : parameshvarastutisArastotram

File name : parameshvarastutisArastotram.itx

Category : misc, stotra, vedanta, brahmAnanda

Location : doc_z_misc_general

Author : mauktikarAmodAsInashiShyabrahmAnanda

Proofread by : PSA Easwaran

Latest update : June 13, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# પરમેશ્વરસ્તુતિસારસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥
ત્વમેકઃ શુદ્ધોઽસિ ત્વયિ નિગમબાહ્યામલમયં
પ્રપઞ્ચં પશ્યન્તિ ભ્રમપરવશાઃ પાપનિરતાઃ ।
બહિસ્તેભ્યઃ કૃત્વા સ્વપદશરણં માનય વિભો
ગજેન્દ્રે દૃષ્ટે તે શરણદ વદાન્યં સ્વપદદમ્ ॥ ૧॥

ન સૃષ્ટેસ્તે હાનિર્યદિ હિ કૃપયાતોઽવસિ ચ માં
ત્વયાનેકે ગુપ્તા વ્યસનમિતિ તેઽસ્તિ શ્રુતિપથે ।
અતો મામુદ્ધર્તું ઘટય મયિ દૃષ્ટિં સુવિમલાં
ન રિક્તાં મે યાચ્ઞાં સ્વજનરત કર્તું ભવ હરે ॥ ૨॥

કદાહં ભોઃ સ્વામિન્નિયતમનસા ત્વાં હૃદિ ભજન્નભદ્રે
સંસારે હ્યનવરતદુઃખેઽતિ વિરસઃ ।
લભેયં તાં શાન્તિં પરમમુનિભિર્યા હ્યધિગતા
દયાં કૃત્વા મે ત્વં વિતર પરશાન્તિં ભવહર ॥ ૩॥

વિધાતા ચેદ્વિશ્વં સૃજતિ સૃજતાં મે શુભકૃતિં
વિધુશ્ચેત્પાતા માઽવતુ જનિમૃતેર્દુઃખજલધેઃ ।
હરઃ સંહર્તા સંહરતુ મમ શોકં સજનકં
યથાહં મુક્તઃ સ્યાં કિમપિ તુ તથા તે વિદધતામ્ ॥ ૪॥

અહં બ્રહ્માનન્દસ્ત્વમપિ ચ તદાખ્યઃ સુવિદિતઃ
સ્તતોઽહં ભિન્નો નો કથમપિ ભવત્તઃ શ્રુતિદૃશા ।
તથા ચેદાનીં ત્વં ત્વયિ મમ વિભેદસ્ય જનનીં
સ્વમાયાં સંવાર્ય પ્રભવ મમ ભેદં નિરસિતુમ્ ॥ ૫॥

કદાહં હે સ્વામિન્ જનિમૃતિમયં દુઃખનિબિડં
ભવં હિત્વા સત્યેઽનવરતસુખે સ્વાત્મવપુષિ ।
રમે તસ્મિન્નિત્યં નિખિલમુનયો બ્રહ્મરસિકા

રમન્તે યસ્મિંસ્તે કૃતસકલકૃત્યા યતિવરાઃ ॥ ૬॥

પઠન્ત્યેકે શાસ્ત્રં નિગમમપરે તત્પરતયા
યજન્ત્યન્યે ત્વાં વૈ દદતિ ચ પદાર્થાંસ્તવ હિતાન્ ।
અહં તુ સ્વામિંસ્તે શરણમગમં સંસૃતિભયાદ્યથા
તે પ્રીતિઃ સ્યાદ્ધિતકર તથા ત્વં કુરુ વિભો ॥ ૭॥

અહં જ્યોતિર્નિત્યો ગગનમિવ તૃપ્તઃ સુખમયઃ
શ્રુતૌ સિદ્ધોઽદ્વૈતઃ કથમપિ ન ભિન્નોઽસ્મિ વિધુતઃ ।
ઇતિ જ્ઞાતે તત્ત્વે ભવતિ ચ પરઃ સંસૃતિલયાત્
અતસ્તત્ત્વજ્ઞાનં મયિ સુઘટયેસ્ત્વં હિ કૃપયા ॥ ૮॥

અનાદૌ સંસારે જનિમૃતિમયે દુઃખિતમના
મુમુક્ષુસ્સન્ કશ્ચિદ્ભજતિ હિ ગુરું જ્ઞાનપરમમ્ ।
તતો જ્ઞાત્વા યં વૈ તુદતિ ન પુનઃ ક્લેશનિવહૈઃ
ભજેઽહં તં દેવં ભવતિ ચ પરો યસ્ય ભજનાત્ ॥ ૯॥

વિવેકો વૈરાગ્યો ન ચ શમદમાદ્યાઃ ષડપરે
મુમુક્ષા મે નાસ્તિ પ્રભવતિ કથં જ્ઞાનમમલમ્ ।
અતઃ સંસારાબ્ધેસ્તરણસરણિં મામુપદિશન્
સ્વબુદ્ધિં શ્રૌતીં મે વિતર ભગવંસ્ત્વં હિ કૃપયા ॥ ૧૦॥

કદાહં ભો સ્વામિન્નિગમમતિવેદ્યં શિવમયં
ચિદાનન્દં નિત્યં શ્રુતિહૃતપરિચ્છેદનિવહમ્ ।
ત્વમર્થાભિન્નં ત્વામભિરમ ઇહાત્મન્યવિરતં
મનીષામેવં મે સફલય વદાન્ય સ્વકૃપયા ॥ ૧૧॥

યદર્થં સર્વં વૈ પ્રિયમસુધનાદિ પ્રભવતિ
સ્વયં નાન્યાર્થો હિ પ્રિય ઇતિ ચ વેદે પ્રવિદિતમ્ ।
સ આત્મા સર્વેષાં જનિમૃતિમતાં વેદગદિતઃ
તતોઽહં તં વેદ્યં સતતમમલં યામિ શરણમ્ ॥ ૧૨॥

મયા ત્યક્તં સર્વં કથમપિ ભવેત્સ્વાત્મનિ મતિઃ
ત્વદીયા માયા માં પ્રતિ તુ વિપરીતં કૃતવતી ।
તતોઽહં કિં કુર્યાં ન હિ મમ મતિઃ ક્વાપિ ચરતિ
દયાં કૃત્વા નાથ સ્વપદશરણં દેહિ શિવદમ્ ॥ ૧૩॥

નગા દૈત્યાઃ કીશા ભવજલધિપારં હિ ગમિતાસ્ત્વયા
ચાન્યે સ્વામિન્કિમિતિ સમયેઽસ્મિંશ્છયિતવાન્ ।
ન હેલાં ત્વં કુર્યાસ્ત્વયિ નિહિતસર્વે મયિ વિભો
ન હિ ત્વાઽહં હિત્વા કમપિ શરણં ચાન્યમગમમ્ ॥ ૧૪॥

અનન્તાદ્યા વિજ્ઞાનગુણજલધેસ્તેઽન્તમગમન્નતઃ
પારં યાયાત્તવ ગુણગણાનાં કથમયમ્ ।
ગૃણન્યાવદ્ધિત્વા જનિમૃતિહરં યાતિ પરમાં
ગતિં યોગિપ્રાપ્યામિતિ મનસિ બુદ્ધ્વાહમનવમ્ ॥ ૧૫॥

ઇતિ શ્રીમન્મૌક્તિકરામોદાસીનશિષ્યબ્રહ્માનન્દવિરચિતં
પરમેશ્વરસ્તુતિસારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA EASWARAN

*Parameshvarastutisarastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*